कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ षष्ठ काण्डे तृतीयः प्रश्नः॥

हरिः ओम्॥ चात्वालाद्धिष्णियानुप वपति योनिर्वै यज्ञस्य चात्वालं यज्ञस्य सयोनित्वाय देवा वै यज्ञं पराऽजयन्त तमाग्नीध्रात्पुनरपाऽजयन्नेतद्वै यज्ञस्याऽपराजितं यदाग्नीध्रं यदाग्नीध्राद्धिष्णियान् विहरति यदेव यज्ञस्याऽपराजितं तत एवैनं पुनस्तनुते पराजित्यैव खलु वा एते यन्ति ये बहिष्पवमानग्ं सर्पन्ति बहिष्पवमाने स्तुत [१] आहाऽग्नीदग्नीन्वि हर बर्हिः स्तृणाहि पुरोडाशाग्ं अलं कुर्विति यज्ञमेवाऽपजित्य पुनस्तन्वाना यन्त्यङ्गारैर्द्वे सवने वि हरति शलाकाभिस्तृतीयग्ं सशुक्रत्वायाथो सम्भरत्येवैनद्धिष्णिया वा अमुष्मिँल्लोके सोममरक्षन्तेभ्योऽधि सोममाऽहरन्तमन्ववायन्तं पर्यविशन् य एवं वेद विन्दते [२] परिवेष्टारं ते सोमपीथेन व्यार्ध्यन्त ते देवेषु सोमपीथमैच्छन्त तान्देवा अब्रुवन्द्वेद्वे नामनी कुरुध्वमथ प्र वाऽऽप्स्यथ न वेत्यग्नयो वा अथ धिष्णियास्तस्माद्द्विनामा ब्राह्मणोऽर्धुकस्तेषां ये नेदिष्ठं पर्यविशन्ते सोमपीथं प्राऽऽप्नुवन्नाहवनीय आग्नीध्रीयो होत्रीयो मार्जालीयस्तस्मात्तेषु जुह्वत्यतिहाय वषट्करोति वि ह्येऽ [३] ते सोमपीथेनाऽऽर्ध्यन्त देवा वै याःप्राचीराहुतीरजुहवुर्ये पुरस्तादसुरा आसन्ताग्स्ताभिः प्राऽणुदन्त याः प्रतीचीर्ये पश्चादसुरा आसन्ताग्स्ताभिरपानुदन्त प्राचीरन्या आहुतयो हूयन्ते प्रत्यङासीनो धिष्णियान्व्याघारयति पश्चाच्चैव पुरस्ताच्च यजमानो भ्रातृव्यान्प्र णुदते तस्मात्पराचीः प्रजाः प्र वीयन्ते प्रतीचीऽ [४] र्जायन्ते प्राणा वा एते यद्धिष्णिया

यदध्वर्युः प्रत्यङ्धिष्णियानतिसर्पेत्प्राणान्थ्सं कर्षेत्प्रमायुकः स्यान्नाभिर्वा एषा यज्ञस्य यद्धोतोर्ध्वः खलु वै नाभ्यै प्राणोऽवाङपानो यदध्वर्युः प्रत्यङ् होतारमतिसर्पेदपाने प्राणं दध्यात्प्रमायुकः स्यान्नाऽऽध्वर्युरुप गायेद्वाग्वीर्यो वा अध्वर्युर्यदध्वर्युरुपगायेदुद्गात्रे [५] वाचग्ं सं प्र यच्छेदुपदासुकाऽस्य वाक्स्याद्ब्रह्मवादिनो वदन्ति नाऽसग्ग्स्थिते सोमेऽध्वर्युः प्रत्यङ्खसदोऽतीयादथ कथा दाक्षिणानि होतुमेति यामो हि स तेषां कस्मा अह देवा यामं वाऽयामं वाऽनु ज्ञास्यन्तीत्युत्तरेणाऽऽग्नीध्रं परीत्य जुहोति दाक्षिणानि न प्राणान्थ्सं कर्षति न्यऽन्ये धिष्णिया उप्यन्ते नान्ये यान्निवपति तेन तान्प्रीणाति यान्न निवपति यदनुदिशति तेन तान्॥[६]

*स्तुते विन्दते हि वीयन्ते प्रतीचीरुदात्र उप्यन्ते चतुर्दश च॥**6.3.1**॥*

सुवर्गाय वा एतानि लोकाय हूयन्ते यद्वैसर्जनानि द्वाभ्यां गार्हपत्ये जुहोति द्विपाद्यजमानः प्रतिष्ठित्या आग्नीध्रे जुहोत्यन्तरिक्ष एवाऽऽ क्रमत आहवनीये जुहोति सुवर्गमेवैनं लोकं गमयति देवान् वै सुवर्गं लोकं यतो रक्षाग्स्यजिघाग्ंसन्ते सोमेन राज्ञा रक्षाग्स्यपहत्याऽप्तुमात्मानं कृत्वा सुवर्गं लोकमायन्रक्षसामनुपलाभायाऽऽतः सोमो भवत्यथ [७] वैसर्जनानि जुहोति रक्षसामपहत्यै त्वग्ं सोम तनूकृद्भ्य इत्याह तनूकृद्ध्येष द्वेषोभ्योऽन्यकृतेभ्य इत्याहाऽन्यकृतानि हि रक्षाग्स्युरु यन्ताऽसि वरूथमित्याहोरु णस्कृधीति वावैतदाह जुषाणो अप्तुराज्यस्य वेत्वित्याहाऽप्तुमेव यजमानं कृत्वा सुवर्गं लोकं गमयति रक्षसामनुपलाभायाऽऽ सोमं ददत [८] आ ग्राव्ण्ण आ वायव्यान्या

द्रोणकलशमुत्पुनीमा नयन्त्यन्वनाग्ंसि प्र वर्तयन्ति यावदेवाऽस्याऽस्ति तेन सह सुवर्गं लोकमेति नयवत्यर्चाऽऽग्नीध्रे जुहोति सुवर्गस्य लोकस्याऽभिनीत्यै ग्राव्ण्णो वायव्यानि द्रोणकलशमाग्नीध्र उप वासयति वि ह्येनं तैर्गृह्णते यथ्सहोपवासयेदपुवायेत सौम्यर्चा प्र पादयति स्वयै- [९] वैनं देवतया प्र पादयत्यदित्याः सदोऽस्यदित्याः सद आ सीदेत्याह यथायजुरेवैतद्यजमानो वा एतस्य पुरा गोप्ता भवत्येष वो देव सवितः सोम इत्याह सवितृप्रसूत एवैनं देवताभ्यः सं प्र यच्छत्येतत्त्वग्ं सोम देवो देवानुपागा इत्याह देवो ह्येष स- [१०] न्देवानुपैतीदमहं मनुष्यो मनुष्यानित्याह मनुष्यो १ ह्येष सन्मनुष्यानुपैति यदेतद्यजुर्न ब्रूयादप्रजा अपशुर्यजमानः स्याथ्सह प्रजया सह रायस्पोषेणेत्याह प्रजयैव पशुभिः सहेमं लोकमुपावर्तते नमो देवेभ्य इत्याह नमस्कारो हि देवानाग् स्वधा पितृभ्य इत्याह स्वधाकारो हि [११] पितृणामिदमहं निर्वरुणस्य पाशादित्याह वरुणपाशादेव निर्मुच्यतेऽग्ने व्रतपत आत्मनः पूर्वा तनूरादेयेत्याहुः को हि तद्वेद यद्वसीयान्थ्स्वे वशे भूते पुनर्वा ददाति न वेति ग्रावाणो वै सोमस्य राज्ञो मलिम्लुसेना य एवं विद्वान्ग्राव्ण्ण आग्नीध्र उपवासयति नैनं मलिम्लुसेना विन्दति॥[१२]

अथ ददते स्वया सन्थ्स्वधाकारो हि विन्दति||6.3.2||

वैष्णव्यर्चा हुत्वा यूपमच्छैति वैष्णवो वै देवतया यूपः स्वयैवैनं देवतयाऽच्छैत्यत्यन्यानगान्नाऽन्यानुपाऽगामित्याहाऽति ह्यन्यानेति नाऽन्यानुपैत्यर्वाक्त्वा परैरविदं परोऽवरैरित्याहाऽर्वाग्ध्येनं परैर्विन्दति परोऽवरैस्त्वं त्वा जुषे [१३] वैष्णवं देवयज्याया इत्याह देवयज्यायै ह्येनं जुषते देवस्त्वा सविता मध्वाऽनक्त्वित्याह

तेजसैवैनमनक्त्योषधे त्रायस्वैनग्ग् स्वधिते मैनग्ं हिग्ंसीरित्याह वज्रो वै स्वधितिः शान्त्यै स्वधितेर्वृक्षस्य बिभ्यतः प्रथमेन शकलेन सह तेजः परा पतति यः प्रथमः शकलः परापतेत्तमप्या हरेथ्सतेजस- [१४] मेवैनमाहरतीमे वै लोका यूपात्प्रयतो बिभ्यति दिवमग्रेण मा लेखीरन्तरिक्षं मध्येन मा हिग्ंसीरित्याहैभ्य एवैनं लोकेभ्यः शमयति वनस्पते शतवल्शो वि रोहेत्यावव्रश्चने जुहोति तस्मादावव्रश्चनाद्वृक्षाणाम्भूयाग्ंस उत्तिष्ठन्ति सहस्रवल्शा वि वयग्ं रुहेमेत्याहाऽऽशिषमेवैतामा शास्तेऽनक्षसङ्गं [१५] वृश्चेद्यदक्षसङ्गं वृश्चेदधर्ईषं यजमानस्य प्रमायुकग्ग् स्याद्यं कामयेताऽप्रतिष्ठितः स्यादित्यारोहं तस्मै वृश्चेदेष वै वनस्पतीनामप्रतिष्ठितोऽप्रतिष्ठित एव भवति यङ्कामयेताऽपशुः स्यादित्यपर्णं तस्मै शुष्काग्रं वृश्चेदेष वै वनस्पतीनामपशव्योऽपशुरेव भवति यङ्कामयेत पशुमान्थ्स्यादिति बहुपर्णं तस्मै बहुशाखं वृश्चेदेष वै [१६] वनस्पतीनां पशव्यः पशुमानेव भवति प्रतिष्ठितं वृश्चेत्प्रतिष्ठाकामस्यैष वै वनस्पतीनां प्रतिष्ठितो यः समे भूम्यै स्वाद्योने रूढः प्रत्येव तिष्ठति यः प्रत्यङ्ङुपनतस्तं वृश्चेथ्स हि मेधमभ्युपनतः पञ्चारत्निं तस्मै वृश्चेद्यं कामयेतोपैनमुत्तरो यज्ञो नमेदिति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञ उपैनमुत्तरो यज्ञो [१७] नमति षडरत्निं प्रतिष्ठाकामस्य षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठति सप्तारत्निं पशुकामस्य सप्तपदा शक्वरी पशवः शक्वरी पशूनेवाऽव रुन्धे नवारत्निं तेजस्कामस्य त्रिवृता स्तोमेन संमितं तेजस्त्रिवित्तेजस्व्येव भवत्येकादशारत्निमिन्द्रियकामस्यैकादशाक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुगिन्द्रियाव्येव भवति पञ्चदशारत्निम्भ्रातृव्यवतः पञ्चदशो वज्रो भ्रातृव्याभिभूत्यै सप्तदशारत्निं प्रजाकामस्य सप्तदशः प्रजापतिः प्रजापतेराप्त्या एकविग्ंशत्यरत्निं

प्रतिष्ठाकामस्यैकविग्ं॑शः स्तोमानां प्रतिष्ठा प्रतिष्ठित्या अष्टाश्रिर्भवत्यष्टाक्षरा गायत्री तेजो गायत्री गायत्री यज्ञमुखं तेजसैव गायत्रिया यज्ञमुखेन संमितः॥[१८]

जुषे सतेजसमनक्षसज्ग्ं बजुशाखं वृश्चेदेष वै यज्ञ् उपैनमुत्तरो यज्ञ आत्प्या एकान्न विग्ं॑शतिश्च **||6.3.3||**

पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वेत्याहैभ्य एवैनं लोकेभ्यः प्रोक्षति पराञ्चं प्रोक्षति पराङिव हि सुवर्गो लोकः क्रूरमिव वा एतत्करोति यत्खनत्यपोऽव नयति शान्त्यै यवमतीरव नयत्यूर्वै यवो यजमानेन यूपः संमितो यावानेव यजमानस्तावतीमेवाऽस्मिन्नूर्जं दधाति [१९] पितृणाग्ं॑ सदनमसीति बर्हिरव स्तृणाति पितृदेवत्या २ग्ग् ह्येतद्यन्निखातं यद्बर्हिरनवस्तीर्य मिनुयात्पितृदेवत्यो निखातः स्याद्बर्हिरवस्तीर्य मिनोत्यस्यामेवैनं मिनोति यूपशकलमवाऽस्यति सतेजसमेवैनं मिनोति देवस्त्वा सविता मध्वाऽनक्त्वित्याह तेजसैवैनमनक्ति सुपिप्पलाभ्यस्त्वौषधीभ्य इति चषालं प्रति [२०] मुञ्चति तस्माच्छीर्षत ओषधयः फलं गृह्णन्त्यनक्ति तेजो वा आज्यं यजमानेनाऽग्निष्ठाऽश्रिः संमिता यदग्निष्ठामश्रिमनक्ति यजमानमेव तेजसाऽनक्त्यान्तमनक्त्यान्तमेव यजमानं तेजसाऽनक्ति सर्वतः परि मृशत्यपरिवर्गमेवाऽस्मिन्तेजो दधात्युद्दिवग्ग्ं॑ स्तभानाऽऽन्तरिक्षं पृणेत्याहैषां लोकानां विधृत्यै वैष्णव्यर्चा [२१] कल्पयति वैष्णवो वै देवतया यूपः स्वयैवैनं देवतया कल्पयति द्वाभ्यां कल्पयति द्विपाद्यजमानः प्रतिष्ठित्यै यङ्कामयेत तेजसैनं देवताभिरिन्द्रियेण व्यर्धयेयमित्यग्निष्ठान्तस्याऽश्रिमाहवनीयादित्थं वेत्थं वाऽति नावयेत्तेजसैवैनं देवताभिरिन्द्रियेण व्यर्धयति यङ्कामयेत तेजसैनं देवताभिरिन्द्रियेण समर्धयेयमित्य-

[२२] ग्निष्ठां तस्याऽश्रिमाहवनीयेन संमिनुयात्तेजसैवैनं देवताभिरिन्द्रियेण समर्धयति ब्रह्मवनिं त्वा क्षत्रवनिमित्याह यथायजुरेवैतत्परि व्ययत्यूर्ग्वै रशना यजमानेन यूपः संमितो यजमानमेवोर्जा समर्धयति नाभिदघ्ने परि व्ययति नाभिदघ्न एवाऽस्मा ऊर्जं दधाति तस्मान्नाभिदघ्न ऊर्जा भुञ्जते यं कामयेतोर्जैनं [२३] व्यर्धयेयमित्यूर्ध्वां वा तस्याऽवाचीं वाऽवोहेदूर्जैवैनं व्यर्धयति यदि कामयेतऽवर्षुकः पर्जन्यः स्यादित्यवाचीमवोहेद्वृष्टिमेव नि यच्छति यदि कामयेतावर्षुकः स्यादित्यूर्ध्वामुदूहेद्वृष्टिमेवोद्यच्छति पितॄणां निखातं मनुष्याणामूर्ध्वं निखातादा रशनाया ओषधीनाग्ं रशना विश्वेषा [२४] न्देवानामूर्ध्वग्ं रशनाया आ चषालादिन्द्रस्य चषालग्ं साध्यानामतिरिक्तग्ं स वा एष सर्वदेवत्यो यद्यूपो यद्यूपं मिनोति सर्वा एव देवताः प्रीणाति यज्ञेन वै देवाः सुवर्गं लोकमायन्तेऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति ते यूपेन योपयित्वा सुवर्गं लोकमायन्तमृषयो यूपेनैवाऽनु प्राऽजानन्तद्यूपस्य यूपत्वं [२५] यद्यूपं मिनोति सुवर्गस्य लोकस्य प्रज्ञात्यै पुरस्तान्मिनोति पुरस्ताद्धि यज्ञस्य प्रज्ञायतेऽप्रज्ञातग्ं हि तद्यदतिपन्न आहुरिदं कार्यमासीदिति साध्या वै देवा यज्ञमत्यमन्यन्त तान् यज्ञो नाऽस्पृशत्तान् यद्यज्ञस्याऽतिरिक्तमासीत्तदस्पृशदतिरिक्तं वा एतद्यज्ञस्य यदग्नावग्निं मथित्वा प्रहरत्यतिरिक्तमेत- [२६] द्यूपस्य यदूर्ध्वं चषालात्तेषां तद्भागधेयं तानेव तेन प्रीणाति देवा वै सग्ग्स्थिते सोमे प्र स्रुचोऽहरन्प्र यूपन्तेऽमन्यन्त यज्ञवेशसं वा इदं कुर्म इति ते प्रस्तरग्ग् स्रुचां निष्क्रयणमपश्यन्थ्स्वरुं यूपस्य सग्ग्स्थिते सोमे प्र प्रस्तरग्ं हरति जुहोति स्वरुमयज्ञवेशसाय॥[२७]

*दधाति प्रत्यृचा समर्धयेयमित्यूर्जैनं विश्वेषां यूपत्वमतिरिक्तमेतद्विचत्वारिग्ंशच्च॥**6.3.4**॥*

साध्या वै देवा अस्मिँल्लोक आसन्नाऽन्यत्किं चन मिषत्तेऽग्निमेवाऽग्नये मेधायाऽऽलभन्त न ह्यन्यदालम्भ्यमविन्दन्ततो वा इमाः प्रजाः प्राजायन्त यदग्नावग्निं मथित्वा प्रहरति प्रजानां प्रजननाय रुद्रो वा एष यदग्निर्यजमानः पशुर्यत्पशुमालभ्याग्निं मन्थेद्रुद्राय यजमान- [२८] मपि दध्यात्प्रमायुकः स्यादथो खल्वाहुरग्निः सर्वा देवता हविरेतद्यत्पशुरिति यत्पशुमालभ्याऽग्निं मन्थति हव्यायैवाऽऽसन्नाय सर्वा देवता जनयत्युपाकृत्यैव मन्थ्यस्तन्नेवाऽऽलब्धन्नेवाऽनालब्धमग्नेर्जनित्रमसीत्याहाऽग्नेर्ह्येतज्जनित्रं वृषणौ स्थ इत्याह वृषणौ [२९] ह्येतावुर्वश्यस्यायुरसीत्याह मिथुनत्वाय घृतेनाऽक्ते वृषणं दधाथामित्याह वृषणग्ग् ह्येते दधाते ये अग्निं गायत्रं छन्दोऽनु प्र जायस्वेत्याह छन्दोभिरेवैनं प्र जनयत्यग्नये मथ्यमानायाऽनु ब्रूहीत्याह सावित्रीमृचमन्वाह सवितृप्रसूत एवैनं मन्थति जातायाऽनु ब्रूहि [३०] प्रह्रियमाणायाऽनु ब्रूहीत्याह काण्डेकाण्ड एवैनं क्रियमाणे समर्धयति गायत्रीः सर्वा अन्वाह गायत्रच्छन्दा वा अग्निः स्वेनैवैनं छन्दसा समर्धयत्यग्निः पुरा भवत्यग्निं मथित्वा प्र हरति तौ सम्भवन्तौ यजमानमभि सम्भवतो भवतं नः समनसावित्याह शान्त्यै प्रहृत्य जुहोति जातायैवाऽस्मा अन्नमपि दधात्याज्येन जुहोत्येतद्वा अग्नेः प्रियं धाम यदाज्यं प्रियेणैवैनं धाम्ना समर्धयत्यथो तेजसा॥[३१]

*यजमानमाह वृषणौ जातायाऽनु ब्रूह्यप्यष्टादश च॥**6.3.5**॥*

इषे त्वेति बर्हिरा दत्त इच्छत इव ह्येष यो यजत उपवीरसीत्याहोप ह्येनानाकरोत्युपो

देवान्दैवीर्विशः प्राऽगुरित्याह दैवीर्ह्येता विशः सतीर्देवानुपयन्ति वह्नीरुशिज इत्याहर्त्विजो वै वह्नय उशिजस्तस्मादेवमाह बृहस्पते धारया वसूनीत्या- [३२] ह ब्रह्म वै देवानाम्बृहस्पतिर्ब्रह्मणैवाऽस्मै पशूनव रुन्धे हव्या ते स्वदन्तामित्याह स्वदयत्येवैनान्देव त्वष्टर्वसु रण्वेत्याह त्वष्टा वै पशूनां मिथुनानाग्ं रूपकृद्रूपमेव पशुषु दधाति रेवती रमध्वमित्याह पशवो वै रेवतीः पशूनेवाऽस्मै रमयति देवस्य त्वा सवितुः प्रसव इति [३३] रशनामा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाऽश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्या ऋतस्य त्वा देवहविः पाशेनाऽऽ रभ इत्याह सत्यं वा ऋतग्ं सत्येनैवैनमृतेनाऽऽ रभतेऽक्ष्णया परि हरति वध्यग्ं हि प्रत्यञ्चं प्रतिमुञ्चन्ति व्यावृत्त्यै धर्षा मानुषानिति नि युनक्ति धृत्या अद्भ्य- [३४] स्त्वौषधीभ्यः प्रोक्षामीत्याहाऽद्भ्यो ह्येष ओषधीभ्यः सम्भवति यत्पशुरपां पेरुरसीत्याहैष ह्यपां पाता यो मेधायाऽऽरभ्यते स्वात्तं चित्सदेवग्ं हव्यमापो देवीः स्वदतैनमित्याह स्वदयत्येवैनमुपरिष्टात्प्रोक्षत्युपरिष्टादेवैनं मेध्यङ्करोति पाययत्यन्तरत एवैनं मेध्यङ्करोत्यधस्तादुपोक्षति सर्वत एवैनं मेध्यङ्करोति॥[३५]

वसूनीति प्रसव इत्यभ्द्यौऽन्तरत एवैनन्दश च॥6.3.6॥

अग्निना वै होत्रा देवा असुरानभ्यभवन्नग्नये समिध्यमानायाऽनु ब्रूहीत्याह भ्रातृव्याभिभूत्यै सप्तदश सामिधेनीरन्वाह सप्तदशः प्रजापतिः प्रजापतेराप्त्यै सप्तदशाऽन्वाह द्वादश मासाः पञ्चर्तवः स संवथ्सरः संवथ्सरं प्रजा अनु प्र जायन्ते प्रजानां प्रजननाय देवा वै सामिधेनीरनूच्य यज्ञन्नाऽन्वपश्यन्थ्स प्रजापतिस्तूष्णीमाघार- [३६] माऽघारयत्ततो वै देवा यज्ञमन्वपश्यन्

यत्तूष्णीमाघारमाघारयति यज्ञस्याऽनुख्यात्या असुरेषु वै यज्ञ आसीत्तं देवास्तूष्णीग्ं होमेनाऽवृञ्जत यत्तूष्णीमाघारमाघारयति भ्रातृव्यस्यैव तद्यज्ञं वृङ्क्ते परिधीन्थ्सं मार्ष्टि पुनात्येवैनान्त्रिस्त्रिः सं मार्ष्टि त्र्यावृद्धि यज्ञोऽथो रक्षसामपहत्यै द्वादश सं पद्यन्ते द्वादश [३७] मासाः संवथ्सरः संवथ्सरमेव प्रीणात्यथो संवथ्सरमेवास्मा उप दधाति सुवर्गस्य लोकस्य समष्ट्यै शिरो वा एतद्यज्ञस्य यदाघारोऽग्निः सर्वा देवता यदाघारमाघारयति शीर्षत एव यज्ञस्य यजमानः सर्वा देवता अव रुन्धे शिरो वा एतद्यज्ञस्य यदाघार आत्मा पशुराघारमाघार्य पशुग्ंसमनक्त्यात्मन्नेव यज्ञस्य [३८] शिरः प्रति दधाति सं ते प्राणो वायुना गच्छतामित्याह वायुदेवत्यो वै प्राणो वायावेवाऽस्य प्राणञ्जुहोति सं यजत्रैरङ्गानि सं यज्ञपतिराशिषेत्याह यज्ञपतिमेवाऽस्याऽऽशिषं गमयति विश्वरूपो वै त्वाष्ट्र उपरिष्टात्पशुमभ्यवमीत्तस्मादुपरिष्टात्पशोर्नाऽव द्यन्ति यदुपरिष्टात्पशुग्ं समनक्ति मेध्यमेवै- [३९] नङ्करोत्यृत्विजो वृणीते छन्दाग्स्येव वृणीते सप्त वृणीते सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाग्स्युभयस्यावरुद्ध्या एकादश प्रयाजान् यजति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तं प्र यजति वपामेकः परि शय आत्मैवाऽऽत्मानं परि शये वज्रो वै स्वधितिर्वज्रो यूपशकलो घृतं खलु वै देवा वज्रं कृत्वा सोममघ्नन्घृतेनाऽक्तौ पशुं त्रायेथामित्याह वज्रेणैवैनं वशे कृत्वाऽऽ लभते॥[४०]

आधारं पद्यन्ते द्वादशाऽऽत्मन्नेव यज्ञस्य मेध्यमेव खलु वा अष्टादश च॥6.3.7॥

पर्यग्नि करोति सर्वहुतमेवैनङ्करोत्यस्कन्दायाऽस्कन्नग्ं हि तद्यद्धुतस्य स्कन्दति त्रिः

पर्यग्नि करोति न्यावृद्धि यज्ञोऽथो रक्षसामपहत्यै ब्रह्मवादिनो वदन्त्यन्वारभ्यः पशू ३ र्नाऽन्वारभ्या ३ इति मृत्यवे वा एष नीयते यत्पशुस्तम्यदन्वारभेत प्रमायुको यजमानः स्यादथो खल्वाहुः सुवर्गाय वा एष लोकाय नीयते यत् [४१] पशुरिति यन्नाऽन्वारभेत सुवर्गाल्लोकाद्यजमानो हीयेत वपाश्रपणीभ्यामन्वारभते तन्नेवाऽन्वारब्धं नेवाऽनन्वारब्धमुप प्रेष्य होतर्हव्या देवेभ्य इत्याहेषितग्ं हि कर्म क्रियते रेवतीर्यज्ञपतिं प्रियधाऽऽ विशतेत्याह यथायजुरेवैतदग्निना पुरस्तादेति रक्षसामपहत्यै पृथिव्याः संपृचः पाहीति बर्हि– [४२] रुपाऽस्यत्यस्कन्दायाऽस्कन्नग्ं हि तद्यद्बर्हिषि स्कन्दत्यथो बर्हिषदमेवैनं करोति पराङ्ङा वर्ततेऽध्वर्युः पशोः संज्ञप्यमानात्पशुभ्य एव तन्नि ह्नुत आत्मनोऽनाव्रस्काय गच्छति श्रियं प्र पशूनाप्नोति य एवं वेद पश्चाल्लोका वा एषा प्राच्युदानीयते यत्पत्नी नमस्त आतानेत्याहाऽऽदित्यस्य वै रश्मय [४३] आतानास्तेभ्य एव नमस्करोत्यनर्वा प्रेहीत्याह भ्रातृव्यो वा अर्वा भ्रातृव्यापनुत्त्यै घृतस्य कुल्यामनु सह प्रजया सह रायस्पोषेणेत्याहाऽऽशिषमेवैतामा शास्त आपो देवीः शुद्धायुव इत्याह यथायजुरेवैतत्॥[४४]

लोकाय नीयते यद्बर्ही रश्मयस्सप्तत्रिग्ंशच्च॥6.3.8॥

पशोर्वा आलब्धस्य प्राणाङ्छुगृच्छति वाक्त आ प्यायतां प्राणस्त आ प्यायतामित्याह प्राणेभ्य एवाऽस्य शुचग्ं शमयति सा प्राणेभ्योऽधि पृथिवीग्ं शुक्प्र विशति शमहोभ्यामिति नि नयत्यहोरात्राभ्यामेव पृथिव्यै शुचग्ं शमयत्योषधे त्रायस्वैनग्ग् स्वधिते मैनग्ं हिग्ंसीरित्याह वज्रो वै स्वधितिः [४५] शान्त्यै पार्श्वत आ च्छयति मध्यतो हि मनुष्या आच्छयन्ति तिरश्चीनमा च्छयत्यनूचीनग्ं हि मनुष्या आच्छयन्ति व्यावृत्त्यै

रक्षसां भागोऽसीति स्थविमतो बर्हिरक्त्वाऽपाऽस्यत्यस्नैव रक्षाग्ंसि निरवदयत इदमहग्ं रक्षोऽधमं तमो नयामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह द्वौ वाव पुरुषौ यञ्चैव [४६] द्वेष्टि यश्चैनं द्वेष्टि तावुभावधमं तमो नयतीषे त्वेति वपामुत्खिदतीच्छत इव ह्येष यो यजते यदुपतृन्द्याद्रुद्रोऽस्य पशून्घातुकः स्याद्यन्नोपतृन्द्यादयता स्यादन्ययोपतृणत्त्यन्यया न धृत्यै घृतेन द्यावापृथिवी प्रोण्वाथामित्याह द्यावापृथिवी एव रसेनाऽनक्त्यच्छिन्नो [४७] रायः सुवीर इत्याह यथायजुरेवैतत्क्रूरमिव वा एतत्करोति यद्वपामुत्खिदत्युर्वन्तरिक्षमन्विहीत्याह शान्त्यै प्र वा एषोऽस्माल्लोकाच्च्यवते यः पशुं मृत्यवे नीयमानमन्वारभते वपाश्रपणी पुनरन्वारभतेऽस्मिन्नेव लोके प्रति तिष्ठत्यग्निना पुरस्तादेति रक्षसामपहत्या अथो देवता एव हव्येना- [४८] ऽन्वेति नाऽन्तममङ्गारमति हरेद्यदन्तममङ्गारमतिहरेद्देवता अति मन्येत वायो वीहि स्तोकानामित्याह तस्माद्विभक्ताः स्तोका अव पद्यन्तेऽग्रं वा एतत्पशूनां यद्वपाऽग्रमोषधीनाम्बर्हिरग्रेणैवाऽग्रग्ं समर्धयत्यथो ओषधीष्वेव पशून्प्रति ष्ठापयति स्वाहाकृतीभ्यः प्रेष्येत्याह [४९] यज्ञस्य समिष्ट्यै प्राणापानौ वा एतौ पशूनां यत्पृषदाज्यमात्मा वपा पृषदाज्यमभिघार्य वपामभि घारयत्यात्मन्नेव पशूनां प्राणापानौ दधाति स्वाहोर्ध्वनभसं मारुतं गच्छतमित्याहोर्ध्वनभा ह स्म वै मारुतो देवानां वपाश्रपणी प्र हरति तेनैवैने प्र हरति विषूची प्र हरति तस्माद्विष्वञ्चौ प्राणापानौ॥[५०]

स्वधितिश्चैवाऽच्छिन्नो हव्येनेष्येत्याह षट्चत्वारिग्ंशच्च॥6.3.9॥

पशुमालभ्य पुरोडाशं निर्वपति समेधमेवैनमा लभते वपया प्रचर्य पुरोडाशेन प्र

चरत्यूग्वै पुरोडाश ऊर्जमेव पशूनां मध्यतो दधात्यथो पशोरेव छिद्रमपि दधाति पृषदाज्यस्योपहत्य त्रिः पृच्छति शृतग्ं हवी ३ श्शमितरिति त्रिषत्या हि देवा योऽशृतग्ं शृतमाह स एनसा प्राणापानौ वा एतौ पशूनां [५१] यत्पृषदाज्यं पशोः खलु वा आलब्धस्य हृदयमात्माऽभि समेति यत्पृषदाज्येन हृदयमभिघारयत्यात्मन्नेव पशूनां प्राणापानौ दधाति पशुना वै देवाः सुवर्गं लोकमायन्तेऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति तस्य शिरश्छित्त्वा मेधं प्राऽक्षारयन्थ्स प्रक्षोऽभवत्तत्प्रक्षस्य प्रक्षत्वं यत्प्लक्षशाखोत्तरबर्हिर्भवति समेधस्यैव [५२] पशोरव द्यति पशुं वै ह्रियमाणग्ं रक्षाग्स्यनु सचन्तेऽन्तरा यूपञ्चाऽऽहवनीयञ्च हरति रक्षसामपहत्यै पशोर्वा आलब्धस्य मनोऽप क्रामति मनोतायै हविषोऽवदीयमानस्याऽनु ब्रूहीत्याह मन एवाऽस्याऽव रुन्ध एकादशाऽवदानान्यव द्यति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तस्याऽव [५३] द्यति हृदयस्याऽग्रेऽव द्यत्यथ जिह्वाया अथ वक्षसो यद्वै हृदयेनाऽभि गच्छति तज्जिह्वया वदति यज्जिह्वया वदति तदुरसोऽधि निर्वदत्येतद्वै पशोर्यथापूर्वं यस्यैवमवदाययथाकाममुत्तरेषामवद्यति यथापूर्वमेवाऽस्य पशोरवत्तम्भवति मध्यतो गुदस्याऽव द्यति मध्यतो हि प्राण उत्तमस्याऽव द्यत्यु– [५४] त्तमो हि प्राणो यदीतरं यदीतरमुभयमेवाऽजामि जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी तदवदानैरेवाऽव दयते तदवदानानामवदानत्वं देवासुराः संयत्ता आसन्ते देवा अग्निमब्रुवन्त्वया वीरेणाऽसुरानभि भवामेति [५५] सोऽब्रवीद्वरं वृणै पशोरुद्धारमुद्धरा इति स एतमुद्धारमुदहरत दोः पूर्वार्धस्य गुदं मध्यतः श्रोणिं जघनार्धस्य ततो देवा अभवन्पराऽसुरा यत्त्यङ्गणाग्ं समवद्यति भ्रातृव्याभिभूत्यै

भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्यक्ष्णयाऽव द्यति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै॥[५६]

एतौ पशूनाग्ं समर्धस्यैव तस्याऽवौत्तमस्याऽव द्यतीति पञ्चचत्वारिग्ंशच्च॥6.3.10॥

मेदसा स्रुचौ प्रोर्णोति मेदोरूपा वै पशवो रूपमेव पशुषु दधाति यूषन्नवधाय प्रोर्णोति रसो वा एष पशूनां यद्यू रसमेव पशुषु दधाति पार्श्वेन वसाहोमं प्र यौति मध्यं वा एतत्पशूनां यत्पार्श्वग्ं रस एष पशूनां यद्वसा यत्पार्श्वेन वसाहोमं प्रयौति मध्यत एव पशूनाग्ं रसं दधाति घ्नन्ति [५७] वा एतत्पशुं यथ्संज्ञपयन्त्यैन्द्रः खलु वै देवतया प्राण ऐन्द्रोऽपान ऐन्द्रः प्राणो अङ्गेअङ्गे नि देध्यदित्याह प्राणापानावेव पशुषु दधाति देव त्वष्टर्भूरि ते सग्ं समेत्वित्याह त्वाष्ट्रा हि देवतया पशवो विषुरूपा यथ्सलक्ष्माणो भवथेत्याह विषुरूपा ह्येते सन्तः सलक्ष्माण एतर्हि भवन्ति देवत्रा यन्त- [५८] मवसे सखायोऽनु त्वा माता पितरो मदन्त्वित्याहाऽनुमतमेवैनं मात्रा पित्रा सुवर्गं लोकं गमयत्यर्धर्चे वसाहोमं जुहोत्यसौ वा अर्धर्च इयमर्धच इमे एव रसेनाऽनक्ति दिशो जुहोति दिश एव रसेनाऽनक्त्यथो दिग्भ्य एवोर्जग्ं रसमव रुन्धे प्राणापानौ वा एतौ पशूनां यत्पृषदाज्यं वानस्पत्याः खलु [५९] वै देवतया पशवो यत्पृषदाज्यस्योपहत्याऽह वनस्पतयेऽनु ब्रूहि वनस्पतये प्रेष्येति प्राणापानावेव पशुषु दधात्यन्यस्यान्यस्य समवत्तग्ं समवद्यति तस्मान्नानारूपाः पशवो यूष्णोप सिञ्चति रसो वा एष पशूनां यद्यू रसमेव पशुषु दधातीडामुप ह्वयते पशवो वा इडा पशूनेवोप ह्वयते चतुरुप ह्वयते [६०] चतुष्पादो हि पशवो यङ्कामयेताऽपशुः स्यादित्यमेदस्कं तस्मा आ दध्यान्मेदोरूपा वै पशवो रूपेणैवैनं पशुभ्यो

निर्भजत्यपशुरेव भवति यं कामयेत पशुमान्थ्स्यादिति मेदस्वत्तस्मा आ दध्यान्मेदोरूपा वै पशवो रूपेणैवाऽस्मै पशूनव रुन्धे पशुमानेव भवति प्रजापतिर्यज्ञमसृजत स आज्यं [६१] पुरस्तादसृजत पशुं मध्यतः पृषदाज्यं पश्चात्तस्मादाज्येन प्रयाजा इज्यन्ते पशुना मध्यतः पृषदाज्येनाऽनूयाजास्तस्मादेतन्मिश्रमिव पश्चाथ्सृष्टग्ग् ह्येकादशाऽनूयाजान्यजति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तमनु यजति घ्नन्ति वा एतत्पशुं यथ्संज्ञपयन्ति प्राणापानौ खलु वा एतौ पशूनां यत्पृषदाज्यं यत्पृषदाज्येनाऽनूयाजान् यजति प्राणापानावेव पशुषु दधाति॥[६२]

घन्ति यन्नङ्लु चतुरुप ह्वयत आज्यं यत्पृषदाज्येन षट्च॥6.3.11॥

चात्वालाथ्सुवर्गाय यद्वैसर्जनानि वैष्णव्यर्चा पृथिव्यै साध्या इषे त्वेत्यग्निना पर्यग्नि पशोः पशुमालभ्य मेदसा स्रुचावेकादश॥11॥

चात्वालाद्देवानुपैति मुञ्चति प्रह्रियमाणाय पर्यग्नि पशुमालभ्य चतुष्पादो द्विषष्टिः॥६२॥

चात्वालात्पशुषु दधाति॥6.3.11॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति षष्ठ काण्डे तृतीयः प्रश्नः॥